अथातो मानस्तोककल्पं व्याख्यास्यामः । कृच्छ्रातिकृच्छ्र-
चान्द्रायणैरात्मानं संशोध्य, पूतशरीरेण शाकयावकपयोभिक्षा-
हारेण यदि सहस्रं जुहुयात्, दशसाहस्रिको जपः । सर्वहोमेषु
जपस्यान्तेऽहोरात्रं निरन्ध्रं जह्वौदुम्बरे च समाप्तौ महाव्याहृ-

तिभिः सर्पिरभिमन्त्र्य प्राश्य कृतपुरश्चरणो भवति । पश्चात्कर्म
समारभेत् । अथ तीक्ष्णतैलेन सप्ताभिमन्त्रितेन स्नात्वा यावज्जी-
वकृतपापनिर्मुक्तो भवति । ब्रह्मवर्चसकामो घृताक्ताहुतीनाम-
ष्टसहस्रं जुहुयात् सर्वकामसमर्थो भवति । श्रीकामो दशरात्रमु-
पोषितः पद्मानां घृताक्तानां दशसहस्रं जुहुयात् भगवन्तमीशानं
पश्यति, स ईप्सितान् कामान् प्रयच्छति । दर्शनाभावे लक्षं
लभते । अर्थकामोऽपामार्गतण्डुलदधिघृताक्तं दशसहस्रं जुहुयात्
सर्वार्थसमृद्धो भवति । गोशफेनाज्याहुतीनामष्टसहस्रं जुहुयात्
गोसहस्रं लभते । हिरण्यकामो दशरात्रमुपोषितो बिल्वफलानां
घृताक्तानां दशसहस्रं जुहुयात् । सिद्धे कर्मणि सुवर्णानि,
असिद्धे रजतान्यष्टसहस्राणि लभते । अमोघं कर्मेत्याचक्षते ।
कन्याकामोऽमुकी मे भार्या भवत्विति जातीपुष्पाणां मधुघृता-
क्तानामष्टसहस्रं जुहुयात् सा कन्या भार्या भवति । अन्येभ्यो
न दीयते । पुत्रकामः कपिलायाः सवत्सायाः श्वेतायाश्च वत्सप्र-
सूताया आद्यं दुग्धं चानीय तेन दुग्धेन चरुं श्रपयित्वा अग्नौ
मन्त्रेण कृत्वा चरुं स्वयमुद्धृत्याष्टसहस्राभिमन्त्रितं कृत्वा पत्न्या
सह भक्षयेदायुष्मतः पुत्रान् दृढशरीरान् जनयति पुष्टिमन्तश्च
भवन्ति। आयुःकामो दूर्वाप्रवालानां दधिमधुघृताक्तानामष्टसहस्रं
जुहुयात् । उपतापं प्रशमयति । क्षुद्रपशुकामो गृहमध्ये कुश-
काशपुष्पाणां दधिमधुघृताक्तानामष्टसहस्रं जुहुयात् क्षुद्राः पशव
उत्पद्यन्ते । राजानं वशयितुं त्रिरात्रोपोषितो भूत्वा चतुःपथं
गत्वा गोमयेनाग्निवर्णां भूमिं कृत्वा घृतेन मुखं पूरयित्वा भूम्यां

मुखेन घृताहुतीर्जुहुयात् पार्थिवो वशो भवति । यथेप्सितं करोति । अमोघं कर्मेत्याचक्षते । तीक्ष्णतैलेन समाभिमन्त्रितेन स्वहस्तौ म्रक्षयित्वा यं स्पृशति सोऽस्य वशो भवति । ब्रह्मवर्चसकामो बिल्वसमिधां दधिमधुघृताक्तानां शतसहस्रं जुहुयात् सर्वकर्मसमर्थो भवति । अन्नाद्यकाम उदुम्बरसमिधां दधिमधुघृताक्तानां दशसहस्रं जुहुयादक्षय्यमन्नमुत्पद्यते । अर्थकामः पलाशसमिधां कटुतैलाक्तानां शतसहस्रं जुहुयादक्षय्यमन्नाद्यं भवति । शत्रुमुत्सादयितुकामो अपामार्गसमिधां कटुतैलाक्तानामष्टसहस्रं जुहुयात् सद्यः शत्रुर्नश्यति । सर्वोपद्रवे शर्करां गृहीत्वा प्रतिदिशं क्षिपेद्दिशां बन्धो भवति ।

स्थितो वा यदि वासीनः शुचिर्वा यदि वाऽशुचिः ।
मानस्तोकप्रवचनान्मुच्यते सर्वकिल्बिषैः ॥

सुरां च पीत्वा गुरुदारांश्च गत्वा सुवर्णस्तेयं ब्रह्महत्यां च कृत्वा । इमां रौद्रीं मतां देवस्य प्रियां शुभां मानस्तोकं त्रिसन्ध्यमधीत्य न स पापेन लिप्यते । अद्भिः पुष्करमिव । कल्पमधीत्य सततं कर्म प्रदधानः सर्वान् कामानवाप्नोति । रुद्रस्यानुचरो भवेदिति ।